इति तद्भाष्ये सायनः ॥ प्राणित्यनेनेति । करणे ल्युट् । ) गले, पुं । इति शब्दचन्द्रिका ॥

प्राणनाथः, पुं, ( प्राणानां नाथः । ) पतिः । इति शब्दरत्नावली ॥ ( यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"

स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे । ६ ।

"धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")

प्राणन्तः, पुं, ( प्राणित्यनेनेति । प्र+अन+"रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणा० ३ । १२७ । इति झच् । ) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ रसाञ्जनम् । इत्युणादिकोषः ॥

प्राणन्ती, स्त्री, ( प्र+अन् झच् । स च षित् । षित्त्वात् ङीष् । ) क्षुत् । हिक्का । इत्युणादिकोषः ॥

प्राणप्रदा, स्त्री,(प्राणं प्रददातीति । प्र+दा+कः ।) ऋद्धिनामकौषधम् । इति रत्नमाला ॥ ( प्राणदातरि, त्रि । यथा, कथासरित्सागरे ।२२।८६।

"त्वाञ्च दृष्ट्वाधुनात्मीयो देवि ! प्राणप्रदः सुहृत् ।
सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः ॥")

प्राणभास्वान्, [ त् ] पुं, ( प्राणेन वायुना जलेन वा भास्वान् उद्दीप्तः । ) समुद्रः । इति शब्दरत्नावली ॥

प्राणमयकोषः, पुं, (प्राणमयः कोषः आच्छादकः ।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्तसारः ॥

प्राणसंयमः, पुं, ( प्राणानां संयमः । ) प्राणायामः । यथा, "तदशक्तौ तच्चतुर्थमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ॥

प्राणसद्म, [ न् ] क्ली, ) प्राणानां सद्म गृहम् । ) शरीरम् । इति केचित् ॥

प्राणसमा, स्त्री, ( प्राणानां समा । ) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ ( यथा, गीतगोविन्दे । १ । ३८ ।

"नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥"

प्राणतुल्ये, त्रि । यथा, रामायणे ।१।१।२६।

"रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥"

तथा च तत्रैव । २ । ३१ । १० ।

"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥"

पत्यौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥ )

प्राणहारकं, क्ली, ( प्राणान् हरतीति । हृ+ण्वुल् । ) वत्सनाभः । इति राजनिर्घण्टः ॥ असुनाशके, त्रि ॥

प्राणाः, पुं, ( प्राणित्येभिरिति । प्र+अन+करणे घञ् । ) असवः । इत्यमरः । २ । ८ । ११९ ॥ "हे अङ्गसन्निहितेषु पञ्चवायुषु । अस्यन्ते असवः नाम्नोति उः । प्राणिति एभिः प्राणाः घञ् । एवमिति असुवत् प्राणा अपि पुं बहुत्वे इत्यर्थः । असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदेऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ ( यथा हितोपदेशे । १ । ७३ ।

"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः ॥"

शरीरस्थपञ्चप्राणा यथा,—

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।"
शरीरस्था इमे——————॥"

इत्यमरः । १ । १ । ६७ ॥

"इमे प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥'

एवं तद्व्यापाराश्च यथा,—

अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"

इति च भरतः ॥

प्राणकराणि यथा,—

"सद्योमांसं नवान्नञ्च बालास्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यः प्राणकराणि षट् ॥"

प्राणहराणि यथा,—

"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"

इति चाणक्यकर्म्मलोचने ॥

प्राणवियोगकालकर्त्तव्यं यथा,—

"कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विकलं तत्र शीघ्रं निःसारयेद्गृहात् ॥
कुशास्तरणशायी च दिशः सर्व्वा न पश्यति ।
सत्यस्तुतिर्मुहूर्त्तान्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्वभावेन भूमे देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ॥
अम्हतं क्षरयन्त्यश्च प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन शीघ्रं मुच्येत किल्बिषात् ॥
पश्चात् श्रुतिपथं दिव्यसुतकर्णेन च श्रावयेत् ॥
यावत्प्राणान् प्रमुच्येत कृत्वा कर्म्म सुदुष्करम् ॥
दृष्ट्वा सुविकलं हीनं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोक्षणम् ।
मधुपर्कं त्वरन् गृह्य इदं मन्त्रमुदाहरेत् ॥"

मन्त्रः ।

"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वम्हतेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियाणां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
तत एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ।
पुरुषो म्हत्युकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतात् प्राणात् संसारञ्च न गच्छति ।
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा म्हत्युवशं गतम् ॥
महावनस्पतिं गत्वा गन्धांश्च विविधानपि ॥
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोमयकरं वास्य तत्सर्व्वं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च ॥
तीर्थाद्यावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयूर्बलदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा ।
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ॥
प्राणान्तन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ॥
देवानभिमुखान् ध्यात्वा गृह्य हस्ते हुताशनम् ।
प्रज्वाल्य विधिवत्तच्च मन्त्रमेतदुदाहरेत् ॥"

मन्त्रः-।

"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
म्हत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दहेयं तस्य गात्राणि देवलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवम्भवति पुत्रक ! ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥
म्हतनाम तथोद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाशौचं देवकर्म्म न कारयेत् ॥"

इति वराहपुराणे श्राद्धोत्पत्तिनामाध्यायः ॥

प्राणा, स्त्री, ( प्राणिति बहुकालमिति । प्र+अन+अच् । टाप् । ) पक्षिणीविशेषः । सा चारुणगरुड़योः श्वश्रूः । यथा,—

"पुलहस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः षड़िति विख्याताः प्राणाया वै विजज्ञिरे ॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी ।
अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ॥
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिसत्तमौ ।
सम्पातिर्जनयन् गृध्रान् काकाः पुत्त्रा जटायुषः ॥
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥"

इत्यग्निपुराणम् ॥

प्राणाधिनाथः, पुं, ( प्राणानामधिनाथः । ) पतिः । इति हलायुधः । २ । ३४२ ॥

प्राणापानौ, पुं, ( प्राणश्च अपानश्च तौ । तदात्मकौ वायू । यथा, विष्णुपुराणे ।६।७।४१।

"परस्परेणाभिभवं प्राणापानौ यदानिलौ ॥")

अश्विनीकुमारौ । यथा,—

"प्राणापानौ कथं देवावश्विनौ संबभूवतुः ॥"

इति प्रजापालप्रश्ने ।